# shrIshabarigiryaShTakaM

# શ્રીશબરિગિર્યષ્ટકમ્

## Document Information

Text title : Shabarigiri Ashtakam

File name : shabarigiryaShTakam.itx

Category : deities_misc, ayyappa, aShTaka

Location : doc_deities_misc

Proofread by : Mohan Chettoor

Description/comments : aShTakam book

Latest update : September 28, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# શ્રીશબરિગિર્યષ્ટકમ્

શબરિગિરિપતે ભૂતનાથ તે જયતુ મઙ્ગલં મઞ્જુલં મહઃ ।
મમ હૃદિસ્થિતં ધ્વાન્તરં તવઃ નાશયદ્વિદં સ્કન્દ સોદર ॥ ૧॥

કાન્તગિરિપતે કામિતાર્થદં કાન્તિમદ્તવ કાઙ્ક્ષિતં મયા ।
દર્શયાદ્ભુતં શાન્તિમન્મહઃ પૂરયાર્થિતં શબરિવિગ્રહ ॥ ૨॥

પમ્પયાઞ્ચિતે પરમમઙ્ગલે દુષ્ટદુર્ગમે ગહનકાનને ।
ગિરિશિરોવરે તપસિલાલસં ધ્યાયતાં મનઃ હૃષ્યતિ સ્વયમ્ ॥ ૩॥

ત્વદ્દિદૃક્ષય સઞ્ચિતવ્રતાઃ તુલસિમાલિકઃ કમ્રકન્ધરા ।
શરણ ભાષિણ શઙ્ઘસોજન કીર્તયન્તિતે દિવ્યવૈભવમ્ ॥ ૪॥

દુષ્ટશિક્ષણે શિષ્ટરક્ષણે ભક્તકઙ્કણે મિશતિતે ગણે ।
ધર્મશાસ્ત્રે ત્વયિ ચ જાગ્રતિ સંસ્મૃતે ભયં નૈવ જાયતે ॥ ૫॥

પૂર્ણપુષ્કલા સેવિતાપ્યહો યોગિમાનસામ્ભોજ ભાસ્કરઃ ।
હરિગજાદિભિઃ પરિવૃતો ભવાન્ નિર્ભયસ્વયં ભક્તભીહરઃ ॥ ૬॥

વાચિવર્ત્તતાં દિવ્યનામતે મનસિસન્તતં તાવહં મહઃ ।
શ્રવણયોર્ભવદ્ગુણગણાવલિઃ નયનયોર્ભવત્ મૂર્તિરદ્ભુતાઃ ॥ ૭॥

કરયુગં મમ ત્વદ્પદાર્ચને પદયુગં સદા ત્વદ્પ્રદક્ષિણે ।
જીવિતં ભવદ્ભક્તપૂજને પ્રણતમસ્તુતે પૂર્ણકરુણયા ॥ ૮॥

ઇતિ શ્રીશબરિગિર્યષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by Mohan Chettoor

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*